# द्वितीयपत्रम्

# साहित्यम्

समय: घण्टात्रयम् पूर्णाङ्का: 100

अ. केचन विंशति: प्रश्ना: समाधेया: । (20×2=40)

1. "दशकुमारचरितम्" कस्येयं रचना?
2. वृत्तरत्नाकरस्य प्रणेता क:?
3. का नाम यति:?
4. पुष्पपुरी का?
5. दशकुमारचरितस्य मङ्गलाचरणे कस्य स्तुति:?
6. आर्या छन्दसि पूर्वार्द्धे कति मात्रा:?
7. वृत्तं नाम किम्?
8. क: वामदेवशिष्य:?
9. "अन्येद्यु:" अस्य कोऽर्थ:?
10. "लगुडैर्जर्जरीकृतावयवान्" अस्याभिप्रायं लिखत।
11. लोचनपरुषं कमपि पुरुषं को ददर्श।
12. विन्ध्याटवी कीदृशी आसीत्।
13. "अयासीत्" इत्यत्र धातु: क:, लकारश्च क:?
14. विदेहेश्वर: क:?

15. "कालयवनम्" किमेतत् आसीत्?

16. "सुमतिः लीलावतीकुलशेखररमणी" कस्याः विशेषणमिदम्?

17. "अहं शत्रुजनदुर्लभः" कस्यायं भावः आसीत्?

18. वृत्तरत्नाकरस्य प्रथमाध्यायस्य नाम किम्?

19. "अब्धिभूतरसादीनाम्" अस्य कोऽभिप्रायः?

20. "उच्छ्वासः" शब्दोऽयं कस्मिन् अर्थे प्रयुज्यते?

21. राजवाहनः कस्य पुत्रः आसीत्?

22. "ननु पापाः, न हन्तव्यो ब्राह्मणः" कस्येदं वचनम्?

23. प्रेतपुरी का?

24. सुरोत्तमनन्दिनी का आसीत्?

25. अनुष्टुप् छन्दसि पञ्चमक्षरं कीदृशं भवति।

**ब. केचन पञ्च प्रश्नाः समाधेयाः।** (5×8=40)

26. राजवाहनस्य विद्यावैभवं वर्णयत।

27. संन्यासिनः सन्देशकथनं प्रतिपादयत।

28. राज्ञः गर्भधारणवर्णनं लिखत।

29. दशकुमारचरितस्य मङ्गलश्लोकं लिखित्वा व्याख्यां कुरुत।

30. "कुमारा माराभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन यानेनाभ्युदयाशसं

राजानमकार्षुः। तत्साचिव्यमितरेषां विधाय समुचितां बुद्धिमुपदिश्य शुभे मुहूर्ते सपरिवारं कुमारं विजयाय विससर्ज।"

गद्यमिदं व्याख्यात।

31. शिखरिणीछन्दसः लक्षणोदाहरणं लिखत।

32. राजवाहनमातङ्गयोर्यात्रावर्णनं कुरुत।

33. मालिनीछन्दसः उदाहरणं विलिख्य गणनिर्देशः कार्यः।

स. कश्चनैकः प्रश्नः समाधेयः। (1×20=20)

34. "गद्यं कवीनां निकषं वदन्ति" उक्तिमिमाम् अवलम्ब्य विस्तरेण लिखत।

35. दशकुमारचरितस्य प्रथमोच्छ्वासस्य सारो लेख्यः।

36. वृत्तरत्नाकरस्य परिभाषाऽध्यायस्य विषयवस्तु विवेचयत।

साहित्यम् पूर्णाङ्काः 100

अ. केचन विंशतिः प्रश्नाः समाधेयाः । (20×2=40)

1. पाकशासनः कः आसीत्?
2. फाल्गुनः कस्य भ्राता आसीत्?
3. पुरुषेण यत्नैः कः साध्यः?
4. "भारतम्" इत्यत्र को गणः?
5. वृत्तरत्नाकरस्य प्रणेता कः?
6. "कर्णभारम्" अस्य शब्दस्य व्युत्पत्तिं लिखत।
7. "सुररिपुबलहन्ता" इत्यत्र समासविग्रहो विधेयः।
8. नान्द्यन्ते कः प्रविशति?
9. सगणस्य स्वरूपं किम्?
10. किं नाम वृत्तम्?
11. "धिग्, दत्तस्य न प्रतिगृह्णामि" इति कः कं प्रति कथयति?
12. कालपर्ययाद् का क्षयं गच्छति?
13. संभ्रान्तः कः आसीत्?
14. नागकेतुः कुत्र प्रविशति?
15. "राधेयः शब्दस्यास्य का व्युत्पत्तिः?
16. कीदृशोऽयं दिवसः?
17. "को भवान्, किमर्थमिहागतः" इति केन पृष्टम्?

18. "अक्षयोऽस्तु पतिव्रतानाम्" कस्येदं वचनम्?

19. सूर्य इव कस्य यशः तिष्ठेत्?

20. शक्रः कमारुह्य कर्णार्जुनयोः युद्ध विलोकयति?

21. का नाम विमला?

22. भृगुवंशकेतुः कः?

23. सप्तच्छदः कः?

24. कर्णभारस्य मङ्गलाचरणे किं छन्दः?

25. महत्तरां भिक्षां को याचते?

ब. **केचन पञ्च प्रश्नाः समाधेयाः।** (5×8=40)

26. पुष्पिताग्राछन्दसः लक्षणं विलिख्य उदाहरणे गणनिर्देशः कार्यः।

27. "सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा।
राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः" ॥
अन्वयव्याख्याभावार्थपुरस्सरमयं श्लोको व्याख्येयः।

28. वृत्तरत्नाकरस्य मङ्गलपद्यं विलिख्य गणनिर्देशपूर्वकं भावार्थो लेख्यः।

29. हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः।
उभे बहुमते लोके नास्ति निष्फलता रणे॥
व्याख्यात।

30. कर्णभारस्य भरतवाक्यं लिखित्वा अन्वयव्याख्या-भावार्थपुरस्सरं महत्त्वं निर्दिशत।

31. कर्णशल्ययोर्मध्ये जातस्य परशुरामवृत्तान्तस्य भावो लेख्यः।

32. "शिक्षाक्षयं गच्छति कालपर्ययात्।
सुबद्धमूला निपतन्ति पादपाः।
जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च तथैव तिष्ठति॥"
श्लोकस्यास्य व्याख्या कार्या।

33. "अत्युग्रदीप्तिविषदः समरेऽग्रगण्यः
शौर्ये च सम्प्रति सशोकमुपैति धीमान्।
प्राप्ते निदाघसमये घनराशिरुद्धः
सूर्यः स्वभावरुचिमानिव भाति कर्णः॥"
श्लोकस्यास्य पदच्छेदान्वयव्याख्याभावार्थसहितं विवरणं प्रदेयम्।

**स. कश्चनैकः प्रश्नः समाधेयः।** (1×20=20)

34. महाकविभासस्य परिचयो देयः।

35. कर्णभारस्य सारो लेख्यः।

36. कर्णस्य दानशीलतां ग्रन्थोक्तदिशा प्रतिपादयत।